CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष०पं०१

॥६॥

जमानानिंद्राग्निभ्यामेवोत्तरतः प्रातःसवनेसुररक्षांस्यपघ्नतेतस्मा
देंद्राग्रमच्छावाकः प्रातःसवनेशंसतींद्राग्निभ्यांहिदेवाउत्तरतः प्रा
तःसवनेसुररक्षांस्यपाघ्नतेतेवाउत्तरतोपहताअसुराःपुरस्ता
त्पर्यद्रुवंन्समनीकतस्तेदेवाःप्रतिबुध्याग्निंपुरस्तात्प्रातःसवने
पर्यौहंस्तेग्निनैवपुरस्तात्प्रातःसवनेसुररक्षांस्यपाघ्नततथैवैत
द्यजमानाअग्निनैवपुरस्तात्प्रातःसवनेसुररक्षांस्यपघ्नतेतस्मा
दाग्नेयंप्रातःसवनेमपाप्मानंहतेयएवंवेदतेनैवपुरस्तादप सांबु
प

॥६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हताऽअसुराःपश्चात्परीत्यप्राविशंस्तेदेवाःप्रतिबुध्यविश्वांदेवानात्मानंप
श्चात्तृतीयसवनेपर्यौहंस्तविश्वैरेवदेवैरात्मभिःपश्चात्तृतीयसवनेसुर
रक्षांस्यपाघ्नततथैवैतद्यजमानाविश्वैरेवदेवैरात्मभिःपश्चात्तृतीयस
वनेसुररक्षांस्यपघ्नतेतस्माद्वैश्वदेवंतृतीयसवनमपपाप्मानंहतेयएवं
वेदतेवैदेवाअसुरानेवमपाघ्नतसर्वस्माद्देवयज्ञात्ततोवैदेवाअभव
न्परासुराभवत्यात्मनापरास्यद्विषन्पाप्माभ्रातृव्योभवतियएवंवेदते
देवाऽएवंक्लृप्तेनयज्ञेनापासुरा[illegible]स्यापाप्मा[illegible]नमघ्नताजयन्स्वर्गंलोकं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मपहवैद्विषंतंपाप्मानंभ्रातृव्यंहतेजयतिस्वर्गंलोकंयएवंवेदयश्चैवंविद्वा
न्सवनानिकल्पयति॥१॥नास्तोत्रियंस्तोत्रियस्यानुरूपंकुर्वंतिप्रातःसव
नेहरेवतदह्नोनुरूपंकुर्वंत्यवरेणैवतदह्नःपरमाह्वयारभंतेथतथा
नमध्यंदिनेश्रीर्वैपृष्ठानितानितस्मिन्नतस्थानानियत्स्तोत्रियंस्तोत्रि
यस्यानुरूपंकुर्युस्तयेवविभक्त्स्यात्तृतीयसवनेनस्तोत्रियंस्तोत्रिय
स्यानुरूपंकुर्वंति॥५॥२॥अथातःआरंभणीयाःएवऋजुनीतीनोव
रुणःइतिमैत्रावरुणस्यमित्रोनयतुविद्वानितिप्रणेतावाःएष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

होत्रकाणांयन्मैत्रावरुणास्तस्मादेषाप्रणेतृमतीभवंतीदृंवोविश्वतःस्परीति
ब्राह्मणाछंसिनोहवामहेजनेभ्यइतीइमेवैतयाहरहर्निह्वयंतेनहैषांवि
हवेन्यऽइंद्रंद्विदे॥ यत्रैवंविद्वान्ब्राह्मणाछंस्येतामहरहःशंसतियत्सोमऽआ
सुतेनरऽइत्यच्छावाकस्यैंद्राग्नीऽअजोहवुरितीद्राग्नीऽएवैतयाहरहर्निहृ
यंतेनहैषांविहवेन्यऽइंद्राग्नीवृंद्वे॥ यत्रैवंविद्वानच्छावाकऽएतामहरहःशंसे
तिनावाऽएतास्वर्गस्यलोकस्यनावःसंपारिण्यःस्वर्गमेवैताभिर्लोकम
भिसंतरंति॥६॥३॥ अथातःपरिधोयाऽएवैतस्यामदेवववरुणेतिमैत्रावरु
णी

णस्यैषं स्वश्च धीमहीत्ययं वै लोकऽ३ष मित्यसौ लोकः स्वरित्युभावे
वैतयालोकावारभंतेव्यंतरिक्षमतिरद्धितिब्राह्मणाछंसिनोवि
वत्तचं स्वर्गमेवैभ्यऽएतयालोकंविवृणोतिमद्दे सोमस्यरोचन॥
इं द्रोयदभिनद्वलमितिसिषासवोवाऽएतेयद्दीक्षितास्तस्मादे
षावल्लवतीभवत्युद्गाऽआजदंगिरोभ्यऽआविष्कृण्वन्गुहासती॥
अर्वांचंनुनुदेवल्लमितिसनिमेवैभ्यऽएतयावरुंधऽइंद्रेणरोच
नादिवऽइतिस्वर्गोवैलोकऽइंद्रेणरोचनादिवोदृल्हानिदंहिती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निचा॥स्त्रिराणिनपराणुद॥ऽइतिस्वर्गएवैतयालोकेदृरहः प्रतिष्ठतो तिः१
यत्याहंसरस्वतीवतो रित्यध्वावाकस्यवाग्वैसरस्वतीवाग्वतोरि
तिहेतदाहैडाग्न्योरवोवृणाऽइत्येतस्यवाऽइडाग्न्योः प्रियंधामयदु
गितिप्रियेणैवैनौतद्धाम्नासमर्द्धयतिप्रियेणधाम्नासमृध्यतेयऽ
एवंवेद॥८॥॥३॥भयःपरिधानीयाभवंतिहोत्रकाणांप्रातःसव
नेचमाध्यंदिनेचाहीनाश्चैकाहिकाश्चैततएकाहिकाभिरेवमै
त्रावरुणःपरिदधातितेनास्मांल्लोकांनप्रच्यवतेहीनाभिरच्छा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऐ०पं०२
॥९॥
भिर३

वाकः स्वर्गस्य लोकस्याप्त्या उभयीभिर्ब्राह्मणाच्छंसीतेनोस्माऽउभौव्यन्वार
भमाणाऽएतीमंचामुंचलोकमथोमैत्रावरुणंचाच्छावाकंचाथोऽअही
नंचैकाहंचाथोसंवत्सरंचाग्निष्टोमंचैवमुंसमुभौव्यन्वारभमाणाऽएत्यै
थततएकाहिकाऽएवतृतीयसवनेहोत्रकाणांपरिधानीयाभवंति
प्रतिष्ठावाऽएकाहःप्रतिष्ठायामेवतद्यज्ञमंततःप्रतिष्ठापयंत्ययन
वानंप्रातःसवनेयजेदेकाहेनस्तोममतिशंसेत्तद्यथाभिहेषतेपि
पासतेक्षिप्रंप्रयच्छतादक्तेदथोक्षिप्रंदेवेभ्योन्नाद्यंसोमपीथंप्रय

राम
॥९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

छा नीत्तिक्षिप्रं हास्मिंल्लोके प्रतितिष्ठत्यपरिमिताभिरुत्तयोः सवनयोप्प २
रिमितो वै स्वर्गो ल्लोकः स्वर्गस्य ल्लोकस्याप्त्यै कामं तद्धोतारं शंसेद्य होत्र
काः पूर्वे शंसेयुर्यद्धोता तद्धोत्रकाः प्राणो वै होतांगानि होत्रकाः
समानो वा अयं प्राणोंगान्यनुसंचरति तस्मात्तत्कामं होतारं शंसेद्य
होत्रकाः पूर्वे शंसेयुर्यद्धोता तद्धोत्रकाः सूक्तांते होता परिदध्या
दे स्यथ समान्याऽ एवं तृतीयसवने होत्रकाणां परिधानीया भवं
त्यात्मा वै होतांगानि होत्रकाः समानो वाऽइमेंगानामंतास्तस्मात्स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऐ०पं०२

॥१०॥

मान्यऽएवतृतीयसवने होत्रकाणांपरिधानीयाभवंतिभवंति॥८॥५॥

इतिषष्ठमपंचिकायांद्वितीयोध्यायः समाप्तः॥ ॥हरिः ३ ॐ म॥

आत्वावहंतुहरयऽइतिप्रातःसवनऽउन्नीयमानेभ्योन्वाहवृषण्वतीः

पीतवतीःसुतवतीर्मद्वतीरुपसमृद्धाऽऐंद्रीरन्वाहैंद्रोवैयज्ञोगाय

त्रीरन्वाहगायत्रंवैप्रातःसवनंनवन्यूनाःप्रातःसवनेन्वाहन्यूनेवैरेतः

सिच्यतेदशमध्यंदिनेन्वाहन्यूनेवैरेतःसिक्तंमध्यंस्त्रियैप्राप्य

स्थविष्ठंभवतिनवन्यूनास्तृतीयसवनेन्वाहन्यूनाद्वैप्रजाःप्र

राम

॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जायंतेतद्यदेतानिकेवलसूक्तान्यन्वाहयजमानमेवतद्देगर्भंभूतंप्रजनयति
यज्ञाद्देवयोन्यैतेनहैकेसप्तसप्तान्वाहुःसप्तप्रातःसवनेसप्तमाध्यंदिनेसप्त
तृतीयसवनेयावत्योवैपुरोनुवाक्यास्तावत्योयाज्याःसप्तवैप्रांचोयजंति
सप्तवषट्कुर्वंतितासामेताःपुरोनुवाक्याइतिवदंतस्तत्तथानकुर्याद्य
जमानस्यहतेरेतोविलुंपंत्यथोयजमानमेवयजमानोहिसूक्तेनवभि
र्वाएतंमैत्रावरुणोस्माल्लोकादंतरिक्षलोकमभिप्रवहतिदशभिरंत
रिक्षलोकादमुंलोकमभ्यंतरिक्षलोकोहिज्येष्ठोनवभिरमुष्माल्लो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५१२॥

कात्स्वर्गं लोकमभिनहवैतेनैयजमानं स्वर्गं लोकमभिवोढुमर्हतीति ये समसस्मा
न्वाहुस्तस्मात्केवलत्रा एव सूक्तान्यनुब्रूयात् ॥ ६ ॥ ११ ॥ अथाहयदैंद्रो वै यज्ञो
थकस्माद्द्वावेव प्रातःसवने प्रस्थितानां प्रत्यक्षादैंद्रीभ्यां यजतो होता चैव ब्रा
ह्मणाच्छंसी चेदं ते सोम्यं मधु विक्षि होता यजतीन्द्र त्वा वृषभं वयमिति ब्राह्मणा
च्छंसी नानादेवत्याभिरितरे कथं तेषामैंद्रो भवंतीति मित्रं वयं हवामह इति मै
त्रावरुणो यजति वरुणं सोमपीतय इति यद्वै किंच पीतवत्सदंतदैंद्रं रूपं तेनै
न्द्रीणाति मरुतो यस्य हि क्षय इति पोता यजति स सुगोपातमो जन इत्नीन्द्रो

२२५१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर

८ वै

वैगोपास्तदैंद्रंरूपंतेनैंद्रंप्रीणातियदग्नेपत्नीरिहावहेतिनेष्टायजतित्वष्टारंसोमपीत
यऽइतीद्वौत्वष्टीदैंद्रंरूपंतेनैंद्रंप्रीणात्युक्षान्नायवशान्नायेत्याग्नीध्रोयजति
सोमपृष्ठायवेधसऽइतीग्नीवैवेधास्तदैंद्रंरूपंतेनैंद्रंप्रीणातिप्रातर्या
वभिरागतंदेवेभिर्जेन्यावसू॥इंद्राग्नीसोमपीतयऽइतिस्वयंसमृद्धा
छावाकस्यैवमुहैनाऐंद्रोभवंतियत्रानानादेवत्यास्तेनोन्यादेवताः
प्रीणातियद्‌गायत्र्यस्तेनाग्नेय्यएतदुहैताभिस्त्रयमुपाप्नोति॥१०॥
॥२॥असाविदेवंगोऽऋजीकमंधऽइतिमध्यंदिनऽउन्नीयमानेभ्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऐ० पं० ३
१२

न्वाह वृषण्वतीः पीतवतीः सुतवतीर्मद्वतीरुपसमृद्धा ऐंद्रीरन्वाहैं
द्रो वै यज्ञस्त्रिष्टुभो न्वाह त्रैष्टुभं वै माध्यंदिनं सवनं तदाहुर्यत्तृतीय
सवनस्यैव रूपं मद्वदथ कस्मान्माध्यंदिने मद्वतीरनुचाह यजंति
चाभिरिति माद्यंतीव वै मध्यंदिने देवताः समेव तृतीयसवने माद
३ती यंते तस्मान्माध्यंदिने मद्वतीरनुचाह यजंति चाभिस्तो वै खलु [illegible] र्वं ऽ
एवमाध्यंदिने प्रस्थितानां प्रत्यक्षाद्दैं [illegible] र्यजंते [illegible] भि तृणवतीभि
रेवैः पिबा सोममभि यमुग्र तर्द ऽ३ इति होता यजति स ऽ ई पा

राम
१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हियऽऋजीषीतरुत्रःइतिमैत्रावरुणोयजत्येवापाहिप्रत्नथामंदतुत्वे
तिब्राह्मणाच्छंसीयजत्युवङ्ङिहिसोमकामंत्वाहुरितिपोतायजति
तवायंसोमस्त्वमेह्यर्वाङितिनेष्टायजतींद्रायसोमाःप्रदिवोविदा
नाइत्यच्छावाकोयजत्यापूर्णोऽअस्यकलशःस्वाहेत्याग्नीध्रोयजतितासा
मेताअभितृण्णवत्योभवंतीड्डावैप्रातःसवनेनव्ययजेतसऽएताभि
रेवमाध्यंदिनंसवनमभ्यतृणधदभ्यतृणत्तस्मादेताऽअभितृण्णव
त्योभवंति॥११॥३॥इहोपयातशवसोनपातऽइतितृतीयसवने

ष०पं०३

॥१३॥

उन्नीयमानेभ्योन्वाहवृषण्वतीः पीतवतीः सुतवतीर्मद्वतीरूपसमहा
स्त्वा ऐंद्रार्भवो भवंतितदाहुर्यन्नार्भवीषुस्तुवतेथकस्मादार्भवः पवमा
नऽइत्याचक्षतइतिप्रजापतिर्वैपितऋभून्मर्त्यान्सतोमर्त्यान्कृत्वातृ
तीयसवनऽआभजत्तस्मान्नार्भवीषुस्तुवतेथार्भवःपवमानऽइत्याच
क्षतेथाहयद्यथाछंदसंपूर्वयोःसवनयोरन्वाहगायत्रीःप्रातःसवने
त्रिष्टुभोमाध्यंदिनेथकस्माज्जागतेसतितृतीयसवनेत्रिष्टुभोन्वाहेति
धीतरसंवैतृतीयसवनमथैतदधीतरसंशुक्रियंछंदोयत्रिष्टुप्

साव

॥१३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सवनस्यसरस्वत्याया ऽ इति ब्रूयाद्यथोऽइंद्रमेवैतत्सवनेन्वाभजतीत्य
थाह यदेन्द्राग्नं वैतृतीयसवनमथ कस्माद्देषऽएवैतत्तृतीयसवनेष्ट
स्छितानां प्रत्यक्षादैंद्राग्नेभ्यायुजतीद्रऽस्पृभिर्वाजवद्भिः समुक्षित
मितिहोतैवनानादेवत्याभिरितरैः कथंतेषामेंद्राग्नेभ्यो भवंतीतीन्द्रा
वरुणासुतपाविमं सुतमिति मैत्रावरुणायजेतियुवोरथोऽध्वरं
देववीतयऽइति बहुनि ... वाहतद्धि भूणांरूपमिंद्रश्च सोमं पिबतं बृह
स्पतऽइति ब्राह्मणाछंसीयजत्यावांविरां विंदवः स्वाभुवऽइतिब

ष०पं०२
॥१४॥

हूनिवाहतदृभूणांरूपमावोवहंतुसप्तयोरघुष्यदःइतिपोता
यजतिरघुपत्वानःप्रजिगातबाहुभिरितिबहूनिवाहतदृभू
णांरूपमामवनःसुहवाऽआहिगंतनेतिनेष्टायजतिगंतनेतिब
हूनिवाहतदृभूणांरूपमिंद्राविष्णूपिबतंमध्वोऽअस्येत्यछावा
कोयजत्यावामंधांसिमदिराण्यग्मन्नितिबहूनिवाहतदृभूणां
रूपमिमंस्तोममर्हतेजातवेदसऽइत्याग्नीध्रोयजतिरथमि
वसंमामनीषयेतिबहूनिवाहतदृभूणांरूपमेवमुहेताऽऐं

१ महे

सांब्र॰
॥१४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्धार्भर्ब्यो भवंतियन्नानादेवत्यास्तेनान्यादेवताः प्रीणातियद्वुजगत्या
साहोत्रागतंवैतृतीयसवनंतृतीयसवनस्यैवसमृध्यै॥१२॥ना अ
थाहयद्वुक्छिन्योन्याहोत्राऽअनुवषाअन्याःकथमस्यैताऽऽकिछन्यः
सर्वाःसमाःसमृद्धाभवंतीतियदेवेनाःसंप्रगीर्यहोत्राऽइत्याचक्ष
तेतेनसमायद्वुक्छिन्योन्याहोत्राऽअनुवछाऽअन्याःस्तेनोविषमाऽ
एवमुहास्यैताऽऽकिछन्यःसर्वाःसमाःसमृद्धाभवंत्यथाहत्रांसंति
प्रातःसवनेत्रांसंतिमाध्यंदिनेहोत्रकाःकथमेषांतृतीयसव

षं०पं०२
१५॥

४ ७

नैरासं भवतीति यदेव माध्यंदिने द्वे द्वे सूक्ते शंसंतीति ब्रूयात्तेनेति यथाह यद्युक्थ्यो होता कथं होत्रका उक्थ्या भवंतीति यदेव द्विदेवत्याभि र्यजंतीति ब्रूयात्तेनेति॥१९॥८॥ अथाह यद्देता स्विष्टकृदिज्याः कथमन्यो होत्राः कथमितरा अच्छिन्न्यो भवंतीत्याज्यमेवाग्नीध्रीयायां उक्थमरुत्वती यं पोत्रीयायां वैश्वदेवं नेष्ट्रीयायां एता वा एता होत्रा एवमन्यंगा एवमेवत्यथाह यदेकप्रैषा अन्ये होत्रका अथ कस्माद्द्विप्रैषः पोता द्विप्रैषो नेष्टेति यत्रादो गायत्री सुपर्णो भूत्वा सोममाहरत्तद्देतासां होत्राम

॥१५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्राणामिंद्र उक्थानि परिह्वय होत्रेषु दद्यौ यूयं माभ्यह्वय यद्वं यूयमस्या
वेदिष्वेति ते हाचुर्देवा गाचमे होत्रेषु भावयामेति तस्मात्ते द्विप्रैषे भ
वतेऽचाग्नीध्रीयां प्रभावयांचक्रुस्तस्मात्तस्यैकस्य चौ भूयस्यो याज्या
भवंत्यथाहयद्धोता यक्षद्धोता यक्षदि तिमैत्रावरुणो होत्रे प्रेष्यत्यथ कस्माद्दे
होतृभ्यः संप्रेहोत्राशंसिभ्यो होता यक्षद्धोता यक्षदिति प्रेष्यतीति प्राणो
वै होता प्राणाः सर्वऋत्विजः प्राणो यक्षत्प्राणो यक्षदित्येवतदाहाथाह
स्युद्गातृणां प्रैषाः ३ नो३ इति॥ अस्तीति ब्रूयाद्यदेवैतस्य रात्रौ स्तोत्रं जपे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षं॰पं॰३
॥१६॥

जपित्वास्तु घ भित्याहस ऽ एषांप्रैषोथाहास्यछावाकस्यप्रवारा ३ नां ऽ इति॥
अस्तीतिब्रूयाघदेवैनमध्वर्युराहाछावाकवदस्वयत्तेवाघ भितेषास्यप्र
वरोथाहयदेंद्रावरुणंमैत्रावरुणस्तृतीयसवने शंसत्यथकस्मादस्या
ग्नेयोस्तोत्रियानुरूपोभवतऽइत्यग्निनावैमुखेनदेवाऽअसुरानुक्थेभ्यो
निर्जघ्नुस्तस्मादस्याग्नेयौस्तोत्रियानुरूपोभवतोथाहयदैंद्राबार्हस्प
त्यंब्राह्मणाछंसीतृतीयसवने शंसत्यैंद्रोवैछवमछावाकः कथमेन
योरैंद्रौस्तोत्रियानुरूपाभवंती तीइंद्रोहस्मवाऽअसुरानुक्थेभ्यःप्र जि राम
॥१६॥

गायसोब्रवीत्कश्चाहंचेत्यहंचाहंचेतिहस्मदेवताऽअन्ववयंतिसयदिंद्रःपूर्वःप्र
जिगायतस्मादैनयोरैंद्रंस्तोत्रियानुरूपा भवंतियद्वहंचाहंतिहस्मदेवताः चेर
अन्ववयुस्तस्मान्नानादेवत्यानिशंसते॥१॥८॥अथाहयद्वैश्वदेवंतृतीय वै
सवनमथकस्मादेतान्यैंद्राणिजागतानिसूक्तानितृतीयसवनेऽआ
रंभणीयानिशस्यंतऽइतींद्रमेवैतैरारभ्यंतीतिब्रूयादथोयज्जाग
तंवैतृतीयसवनंतज्जगत्काम्यैवतद्यत्किंचातऽऊर्ध्वंछंदःशस्यतेत
द्धसर्वंजागतंभवत्येतानिचेदैंद्राणिजागतानिसूक्तानितृतीयस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष॰पं॰२
१८॥

वनः आरंभणीया निरास्यं तैर्थे तत्रैष्टुभं मह्यावाकों त्ततः शंसतिसं
वां कर्मणो त्निय देव पनाय्यं कर्म तद्देतद भिवदति समि षेत्यन्न वाऽइषो
न्नाद्यस्या वरुध्या ऽअरिष्टैर्नः पथिभिः पारयंते तिस्वस्तिताया ऽएवैत
दहरहः शंसत्यथाहयज्ञागतं वैन्तृतीयसवनमथ कस्मादेषांत्रि
ष्टुभः परिधानीया भवंतीति वीर्यं वै त्रिष्टुप् वीर्य ऽएवतद्दंततः प्रति
तिष्ठंतो यंतीयमिंद्रं वरुणमष्टमे गीरिति मैत्रावरुणस्य बृहस्प
तिर्नः परिपातु पश्चादिति ब्राह्मणाच्छंसिनऽउभाजिग्यथुरित्यच्छा

राम
॥१८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाकस्यौभोहितौजिग्यतुर्नेपराजेयेथेनपराजिग्यऽइतिनहितयोः
कतरश्चनपराजिग्यऽइंइंद्रश्चविष्णोयदपस्पृधेथांत्रेधासहस्रंवितदैर
येथामितीइंद्रश्चहवैविष्णुश्चासुरैर्युयुधातेतान्हस्मजित्वोचतुःकल्पाम
हाऽइतितेहतथेत्यसुराऊचुःसोब्रवीदिंद्रोयावदेवायंविष्णुस्त्रिर्विक्र
मतेतावदस्माकमथयुष्माकमितरदितिसऽइमांल्लोकांश्चिक्रमेथो
वेदानथोवाचंतदाहुःकिंतत्सहस्रमितीमेलोकाऽइमेवेदाऽअथो
वागितिब्रूयादैरयेथामैरयेथामित्यच्छावाकउक्थ्यंभ्यस्यतिसहित

ष०पं०२
॥१८॥

त्रांस्योसवस्यग्निष्टोमेहोतातिरात्रेचसहितत्रांस्योभवत्यभ्यसेत्स्वोब्ध
शिनीऽनाभ्यसेतऽइति॥ अभ्यसेदित्याहुः कथमन्येषवहः स्वभ्य
स्यतिकथमत्रनाभ्यस्येदितितस्मादभ्यस्येत॥१५॥७॥ अथाहयं
नाराशंसंवैतृतीयसवनमथकस्मादछावाकोंततः शिल्पेषुनाराशं
सीःशंसतीतिविकृतिर्वैनाराशंसंकिमिवचवैकिमिवचरेतोविक्रि
यतेतत्तदाविकृतंप्रजातंभवत्यथैतन्मद्विवछंदःशिथिरंयन्नाराशं
समथैषांस्योयदछावाकस्तदृढ्कृतायैढ्कैप्रतिष्ठास्यामऽइतित

राम
१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३+ संतिष्ठमानानियं त्वेवमेवाहीनस्याहानिसंतिष्ठमानानि+३

स्मादह्वावाकोंततःत्रिंशत्येषवनाराशंसीःशंसतिदृब्ध्ताय़ैदृब्धेप्रतिष्ठा
स्यामःइतिदृब्धेप्रतिष्ठास्यामःइति॥१८॥८॥ ॥इतिषष्ठपंचिकायां
तृतीयोध्यायःसमाप्तः॥ ॥हरिःॐमे॥यएषस्तोत्रियस्तमनुरूपंकुर्वं
तिप्रातःसवनेहीनसंतत्यैयथावाएकाहःसुतःएवमहीनस्तद्यथैकाहस्य
सुतस्यसवनानियंतितद्यएषस्तोत्रियमनुरूपंकुर्वंतिप्रातःसवनेहीनसं
तत्याअहीनमेवतत्संतन्वंतितिवैदेवाश्चऋषयश्चाद्रियंतेसमाने
नयज्ञंसंतनवामेतितएतत्समानंयज्ञस्यापश्यन्समानान्प्रगाथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समानीःप्रतिपदःसमानानिसूक्तान्योकःसारीवाऽइंद्रोयत्रवोऽइंद्रःपू
र्वंगाधत्येवतत्रापरंगाधतियज्ञस्यैवसेंद्रतायै॥१७॥२॥तोन्वाऽ९तोन्सुपा
तान्विश्वामित्रःपृथममपश्यत्तान्विश्वामित्रेणदृष्टान्वामदेवोसृजतै
वात्वामिन्द्रवज्रिन्नत्रयन्नाऽइन्द्रोजुजुषेयच्चवष्टिकथामहामद्वधे
त्कस्यहोतुरितितान्क्षिप्रंसमपतद्यत्क्षिप्रंसमपतत्तत्संपातानां
संपातत्वंसहैक्षांचक्रेविश्वामित्रोयान्वाअहंसंपातानपश्यंतां
न्वामदेवोसृष्टकानिन्वहंसूक्तानिसंपातांस्तत्त्रतिमांतस्रजेयेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना

स एतानि सूक्तानि संपातांस्त्वपश्यत्तिमानसृजत सद्योह जातो वृषभः कनी
नइंद्रः पर्भिदातिरद्दासमर्कैरिमामूषु प्रभृतिं सातये धा इच्छंति त्वासो
म्यासः सखायः शासद्वह्निर्दुहितुर्नप्त्यंगादभितष्टेव दीधया मनीषामि
तिय एक इद्धव्यश्चर्षणीनामिति भरद्वाजो यस्तिग्मशृंगो वृषभो न भीम उद
ब्रह्माण्यैरत श्रवस्येति वसिष्ठोस्मा इदु प्रतवसे तुरायेति नोधास्त एते प्रा
ह तःसवनेषळ्स्तोत्रियासु छंदःसामाध्यंदिने अहीनसूक्तानि शंसंति तान्येतान्य
हीनसूक्तान्यासत्यो यातु मघवां ऋजीषीति ससवनमैन्द्रावरुणोस्मा इदु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष०पं०४ ॥२०॥

स्मा

ऋतवसेतुरायेंद्रायब्रह्माणिराततमा॥इंद्रब्रह्माणिगोतमासोअक्रन्नितिब्रह्मण्वद्ब्रा
ह्मणाच्छंसीयास्तद्वह्निर्जनयंतवह्निमितिवह्निवदच्छावाकस्तदाहुःकस्माद
च्छावाकोवह्निवदेतत्सूक्तमुभयत्रशंसतिपरांचिषुचैवाहस्वभ्यावर्त्तिषुचे
तिवीर्यवान्वाएषबह्वृचोवह्निवदेतत्सूक्तंवहतिहवैवह्निर्धुरोयासुयुज्यते
तस्मादच्छावाकोवह्निवदेतत्सूक्तमुभयत्रशंसतिपरांचिषुचैवाहस्वभ्याव

भि

र्त्तिषुचतानिपंचस्वहःसुभवंतिचतुर्विंशेऽभिजितिविषुवतिविश्वजितिमहाव्रते
हीनानिहवाएतान्यहानिनह्येषुकिंचनहीयतेपरांचीनिहवाएतान्यहान्य

राम ॥२०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नभ्यावर्तीनितस्मादेनान्येतेषूहःसुशंसंतियदेनानिशंसंत्यहीनांत्स्वर्गाल्लो
कात्सर्वरूपात्सर्वसमृद्धान्नवाप्नवामेतियद्वैनानिशंसंतींद्रमेवैतैर्निंद्रियंते
पंचऋषभंवाशितायैयद्वैनानिसंशंसत्यहीनस्यसंतत्याअहीनमेवतत्संत
न्वंति॥१८॥२॥ततोवाएतांस्त्रीन्संपातान्मैत्रावरुणोविपर्यासमेकैकमहरहः
शंसत्येवात्वामिंद्रवज्रिन्नत्रेतिप्रथमेहनियंनाइंद्रोजुजुषेयच्चवष्टीतिद्वितीये
कथामहामहामवृधत्कस्यहोतुरितितृतीयेत्रीनेवसंपातान्ब्राह्मणाछंसी
विपर्यासमेकैकमहरहःशंसतींद्रःपूर्भिदातिरद्दासमर्कैरितिप्रथमेहनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष० पं० ८

॥२१॥

यएकइ च्छव्यश्चर्षणीनामितिद्वितीयेयस्तिग्मशृंगोवृषभोनभीमइतितृतीयेत्री
नेवसंपातानछावाकोविपर्यासमेकैकमहरहः शंसतीमामूषुप्रभृतिंसातयेधा
इतिप्रथमेहनीछंतित्वासोम्यासः सखायइतिद्वितीयेशासद्वह्निर्दुहितुर्नप्त्यं
गाद्वितितृतीयेतानिवाएतानिनवत्रीणिचाहरहः शस्यानिनानिद्वादशसंप
द्यंतेद्वादशवैमासाः संवत्सरः संवत्सरः प्रजापतिःप्रजापतिर्यज्ञस्तत्संवत्सरंप्रजा

१ ति पतिंयज्ञमाप्नुवंतितत्संवत्सरेप्रजापतौयज्ञेहरहः प्रतितिष्ठंतोयंतितान्यंतरेणाराम

वापमावपेरन्नन्यूरव्याविराजोवैमद्वेश्चतुर्थेहनिपंक्तीः पंचमेपारुछेपीःषष्ठे च ॥२१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ज

यान्यहानिमहास्तोमानिस्युः कोऽअयनयोर्देवकामइतिमैत्रावरुणऽआ
वपेतवनेनवायोन्यधाय्यिचाकन्निति ब्राह्मणाच्छंस्यायाहृयवाडुःपवंधुरे
ष्ठाइत्यच्छावाकएतानिवाआवपनान्येतैर्वाऽआवपनैर्देवाःस्वर्गंलो
कमायंनेतैर्ऋषयस्तथैवैतद्यजमानाऽएतैरावपनैःस्वर्गंलोकंजयंति॥
॥१९॥आसद्योहजातोवृषभःकनीनइतिमैत्रावरुणःपुरस्तात्सूक्ता
नामहरहःशंसतितद्वैतत्सूक्तंस्वर्ग्यमेतेनवैसूक्तेनदेवाःस्वर्गंलोक
मजयंन्नेतेनऋषयस्तथैवैतद्यजमानाऽएतेनसूक्तेनस्वर्गंलोकंज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रा॰
२२

यंतितदु वैश्वामित्रं विश्वस्य ह वै मित्रं विश्वामित्र आस विश्वं हास्मै मित्रं भवति य एवं वेद येषां चैवं विद्वान्तेतन्मैत्रावरुणः पुरस्तात्सूक्तानाम् हर हः शंसति तदृषभवत्पशुमद्भवति पशूनामवरुध्यै तत्पंचचं भवति पंचपदां पंक्तिं पंक्तिर्वा अन्नमन्नाद्यस्यावरुध्या इंद्रं दुब्रह्मण्यं रतश्चवस्येति ब्राह्मणाच्छंसी बैह्मण्वत्समद्वं सूक्तमहर हः शंसति तदेतत्सूक्तं स्वर्ग्यमेतेन वै सूक्तेन देवाः स्वर्गं लोकमजयन्नेतेनर्षयस्तथैवैतद्यजमानाः एतेन सूक्तेन स्वर्गं लोकं जयंतितदु वासिष्ठमेतेन वै वसिष्ठः इंद्रस्य प्रियं धामोपाग

त्रिव
२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

छत्सपरमंल्लोकमजयदुपेंद्रस्यप्रियंधामगछतिजयतिपरमंल्लोकंयऽ
एवंवेदतद्धषळृचंषड्वाऋतवोऽऋतूनामाध्यैतदुपरिष्टात्संपातानांशं
संस्याद्वैतेवैस्वर्गंल्लोकंयजमानाअस्मिंल्लोकेप्रतितिष्ठंत्यभितिष्ठेवदी
घयामनीषामित्यछावाकोहरहः शंसत्यभिवत्तस्यैरूपमभिप्रियाणि
मर्मृशत्पराणीतियान्येवपराण्यहानितानिप्रियाणितान्येवतदभिम
र्मृशतोयंत्यभ्यारभमाणाः परोवाअस्माल्लोकात्स्वर्गोलोकस्तमेवत
दभिवदतिकवीरिछामिसंदृशोसुमेधाऽइतियेवैतेनऽऋषयः पूर्वे

राम
॥२३॥

ह्येतास्ते वै कवयस्तानेव तदभ्यतिवदंतिं तदु वै श्वामित्रं विश्वस्य ह वै मित्रं वि
श्वामित्र आस विश्वं हास्मै मित्रं भवति य एवं वेद तदु निरुक्तं प्राजापत्यं रू
सत्यं निरुक्तो वै प्रजापतिः प्रजापतेराप्त्यै सकृदिंद्रं निराह ते नेंद्राद्रूपान्न प्रच्यवंते
तद्द्वादशर्चं द्वादशाक्षरा विराड् विराजान्नाद्यस्यावरुध्यै पदे पदे द्वादशाक्षरा द्वादश वै
प्राणाः प्राणानेव तदाप्नुवंति प्राणानात्मंदधते तदु परिष्टात्संपातानां शंसत्याद
स्वैव तत्स्वर्गं लोकं यजमाना अस्मिं लोके प्रतितिष्ठंति ॥२०॥४॥ कस्तमिंद्र त्वा
वसुं कं नव्यो अतसीनां कद्रू न्वस्या कृतमिति कद्वंतः प्रगाथा आरंभणीया अ

ष०पं०४
॥२३॥

हरहः शंसंते को वै प्रजापतिः प्रजापतेराप्त्यै यद्देवकद्वंतंः ३ अन्नं वै कम
न्नाद्यस्यावरुध्यै यद्देवकद्वंतंः ४ अहरहर्वा एते श्रांतो न्यहीनसूक्तान्यु
पयुंजाना यंति तानि कद्वद्भिः प्रगाथैः शमयंति तान्येभ्यः श्रांतानि कंभ
वंति तान्येनांछ्रातानि स्वर्गं लोकमभिवहंति त्रिष्टुभः सूक्तप्रतिपदः श्रा
सेयुस्ताहैके पुरस्तात्प्रगाथानां शंसंति धाय्या इति वदंतस्तत्तथा कु न ३
र्यात्क्षत्रं वै होता विशो होत्राशंसिनः क्षत्रायैव तद्विशं प्रत्युद्यामिनीं
कुर्युः पापवस्यसं त्रिष्टुभो मःऽइमाः सूक्तप्रतिपदःऽइत्येव विद्यात्तथा श्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ये

समुद्रंप्रप्लवेरन्नेवंहैवतेप्रप्लवंतेसंवत्सरंवाद्वादशाहंवासतेतद्यथासैरावती
न्नावंपारकामाः समारोहेयुरेवमेवैतास्त्रिष्टुभः समारोहंतिनह्वाएतछंदो
गमयित्वास्वर्गंलोकमुपावर्ततेवीर्यवत्तमंहितास्योनव्याहृयीततेसमानंहि
छंदोशोनेद्गाय्याःकरवाणीतियदेनाःशंसंतिप्रज्ञातातामिःसूक्तप्रतिपद्भिः
सूक्तानिसमारोहामेतियदेवैनाःशंसंतीदमेवैताभिर्निह्वयंतेयथऽऋ
षभंवाशितायैयद्वैवेनाःशंसंत्यहीनस्यसंतत्याऽअहीनमेवतत्संत
न्वंति॥२१॥५॥अपप्राचऽइंद्रविश्वांअमित्रानितिमैत्रावरुणःपुर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तास्त्रक्तानामहरह्ःत्वांसत्यपापाचोऽभिभूतेनुदस्व॥अपोदीचोऽप
त्रस्राधराच्चतुरौयथातवत्रार्मन्मदेमैत्र्यमभयस्यरूपमभयमिवह्रियंमि
च्छतिब्रह्मणातेब्रह्मायुज्जायुनज्मीतिब्राह्मणाच्छंस्यहरह्ःत्वांसतियुन
ज्मीतियुच्चेवतीयुक्तोऽइवह्यहीनोहीनस्यरूपमुरुन्नोलोकमनुनेषिवि
द्वानिस्त्यप्चावाकेहरहत्वांसत्यनुनेषीस्यतीवह्यहीनोहीनस्यरूपंत्र
षीतिसत्रायणरूपंतावाएताअहरहःत्वांस्यंतैसमानीभिःपरिदध्यु
रोकःसारीहेषामिंद्रोयज्ञंभवतीऽ॥यथऽत्रेषभोवान्त्रितांयथावा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोःश्वन्नातंगोष्ठमेवंहैषामिंद्रोयज्ञमेवगच्छतिनत्रुनंह्वीययाहीनस्यपरि
दध्यात्क्षत्रियोहराष्ट्राच्च्यवतेयोहैवपरोभवतितमभिह्वयति॥५॥अथा
तोहीनस्ययुक्तिश्चविमुक्तिश्चव्यंतरिक्षमतिरदित्यहीनंयुंक्ते ऽएवेदं
भूमिमितिविमुंचत्याहंसरस्वतीवतोर्नूनंसातइत्यहीनंयुंक्तेतेस्यामदेवं
वरुणंनूनंष्टुतइतिविमुंचत्येषहवाअहीनंतंतुमर्हतियएनंयोक्तुंच
विमोक्तुंचवेदतद्यच्चतुर्विंशेहन्युज्यंतेसायुक्तिरथयत्पुरस्तादुद
यनीयस्यातिरात्रस्यविमुच्यंतेसाविमुक्तिस्तद्यच्चतुर्विंशेहन्नैको

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिकाभिः परिदध्युरत्राहैवयज्ञंसंस्थापयेयुर्न्नाहीनकर्मकुर्युरथयद्
हीनपरिधानीयाभिः परिदध्युर्यथाश्रांतोविमुच्यमानउत्क्रत्येतेवंय
जमानाऽउत्क्रत्येरंनुभयीभिः परिदध्युस्तद्यथादीर्घाध्वऽउपविमोकं
यायात्तादृक्तत्संततोहैषांयज्ञोभवतीमूऽ[illegible]व्यूमुंचंतऽएकोद्वेनद्वयोःस
वनयोस्तोममतिशंसेद्दीर्घारण्यानिहवैभवंतियत्रबह्वीभिस्तोमोति
शस्यतेपरिमिताभिस्तृतीयसवनेपरिमितोवैस्वर्गोलोकःस्वर्गस्य
लोकस्याप्त्यैसंततोहास्याभ्यारब्धोविस्त्रस्तोहीनोभवतियएवंविद्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रा ४

२६

नहीनंतनुते॥२४॥७॥देवावैविलेगाःपर्यपश्यंस्तायज्ञेनैवेप्संस्ताःषष्ठेना
ह्नाप्नुवंस्तेप्रातःसवनेनभाकेनैवलूमनभयांस्तेयदनभयाने॥१॥अश्रथ
यन्नैवैनंतत्तऽउतृतीयसवनेवज्रेणवालखिल्याभिर्वाचःकूटेनैकःप
दयावलेविरुज्यगाऽउदाजंस्तथैवैतद्यजमानाःप्रातःसवनेनभाकेनै
वलुंनभयंतितयेनभयंती॥२॥अथयंसेवैनंतत्तस्माद्धोत्रकःप्रातःसव
नेनाभाकांस्त्रचांघ्नंसंतियःककुभोनिधारयऽइतिमैत्रावरुणःपूर्वेर
श्वरेद्धोपमातयऽइतिब्राह्मणाच्छंसीतादिमध्येभरामित्यच्छावा

शिव

॥२६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कंस्त्तऽउतृतीयसवनैवज्रेणवालखिल्याभिर्वाचःकूटैनैकपद्यावल्कंवि
रुज्यगाऽआप्नुवंतिपछःप्रथमंषड्वालखिल्यानांसूक्तानिविहरेत्यईर्चं
शोद्वितीयम्रक्छुस्तृतीयंसपछोविहरन्प्रगाथेप्रगाथएवैकपदांदध्या
त्सैवाचःकूटस्ताऽएताःपंचैकपदाःश्चतस्रोदशमाःदहेऽएकामहाव्रती
दशाष्टाक्षराणिमाहानामनानिपदानितेषांयावद्भिःसपघेतत्तावंति
शंसेन्नेतराण्याह्वियेतेपाईर्चशो विहरंस्ताश्चैवैकपदाःशंसेत्तानि
चैवाष्टाक्षराणिमाहानामनानिपदान्यथऋक्छो विहरंस्ताश्चैवैकप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दाःत्रांसैतानिचैवाष्टाक्षराणिमाहानामनानिपदानिसयत्प्रथमंषड्वा
लखिल्यानांसूक्तानिविहरतिप्राणंचतद्वाचंचविहरतियद्द्वितीयंच
क्षुःश्चतन्मनःश्चविहरतियत्तृतीयंयश्रोत्रंचतदात्मानंचविहरतितत
दुपाप्तोविहारेकामउपाप्तावज्ञेवालखिल्यासूपाप्तोवाचःकूटः१एक
पदायामुपाप्तःप्राणकृत्स्यामविहृतानेवचतुर्थंत्रुगाथांछंसतिपञ्चा
वोवैप्रगाथाःपशूनामवरुध्यैनात्रैकपदांव्यवदध्याद्यदत्रैकपदांव्यव
दध्याद्वाचःकूटेनयजमानात्पशून्निर्हण्याद्येरेनंतत्रब्रूयाद्वाचः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कूटेनैवयजमानास्यपशून्निरवधीरपशुमेनमकरितितद्वाखलुतथास्यात्तस्मा
त्तत्रैकपदांनव्यवदध्याद्द्विवोत्तमेसूक्तेपर्यस्यतिसऽएवतयोर्विहारस्तदेतत्
सौबलायसर्पिर्वात्सिःशशंससहोवाचभूयिष्ठानहंयजमानेपशून्धार्यै
यहैषमकनिष्ठाउमामागमिष्यंती।।तितत्सैम्हयथामहऽअऽक्षिगम्यऽ
एवंनिनायतदेतत्पशव्यंचस्वर्ग्यंचशंसंतस्मादेतच्छंसति।।२४।।८।।
दूरोहणंरोहतितस्योक्तंब्राह्मणमैंद्रंपशुकामस्यरोहेदैन्द्रावैपश
वस्तज्जागतंस्याज्जागतावैपशवस्तन्महासूक्तंस्याद्भूयिष्ठेष्वेवतस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नर

रुषुयजमानंप्रतिष्ठापयतिबरोरोहैंत्तन्महासूक्तंचजागतंचैंद्रावरु
णेप्रतिष्ठाकामस्यरोहैंदैंदेवतावा ऽएषाहोत्रैतत्प्रतिष्ठायदैंद्रावरुणा
तदेनत्स्वायामेवप्रतिष्ठायामंततः प्रतिष्ठापयतियदैंवैंद्रावरुणा ३
३॥एषाहवा ऽअत्रनिविन्निविदावेकामा ऽआप्यंतेन्मयचैंद्रावरुणे
रोहैंत्तौपर्णेरोहैंत्तदुपाप्तऐंद्रावरुणेकामऽउपाप्तः सोपर्णौ॥२५॥
१॥तदाहुः संत्रंसेत्त्वषष्ठेहा ३ न् ३॥नसंत्रंसेतत्रैतिसंत्रंसेदित्याहुः
कथमन्येषुमहःसुसंत्रंसतिकथमत्रनसंत्रंसेदितियथोखल्वाहुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नैवसंक्रामेत्स्वर्गोवैलोकःषष्ठमहरसमाप्यायीवैस्वर्गोलोकःकश्चिद्वैस्व
र्गेलोकेसमेतीतिसयत्संक्रामेत्समानंतत्कुर्यादथयंनसंक्रामतीमु३॥तत्स्व
र्गस्यलोकस्यरूपंतस्मान्नसंक्रामेच्चदेवनसंक्रामतीति३॥आत्मावैस्तोत्रियःप्रा
णावालखिल्याःसयत्संक्रामेद्देवताभ्यांदेवताभ्यांयजमानस्यप्राणान्वीयाद्य
एनंतत्रब्रूयाद्देवताभ्यांदेवताभ्यांयजमानस्यप्राणान्व्यगात्प्राणएनंहास्यती
तिरश्वत्तथास्यात्तस्मान्नसंक्रामेत्सयदीक्षेतोक्रांसिषंवालखिल्याहंत
पुरस्ताद्रोहणस्यसंक्रामानीतिनोऽएवतस्यात्रा॥मियात्तंयदिदर्पेऽ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रा०५
॥२९॥

वविंदैंदुपरिष्टाद्दूरोहणस्यापिबहूनिशस्तानिशंसेच्चस्यात्तत्कामायतथा
कुर्याद्दिवैवतदुपाप्तमेंज्यावालखिल्याःस्तासांद्वादशाक्षराणिपदानि
तत्रसकामऽउपाप्तोयऽएंद्रेजागतेऽष्टमेंद्रावरुणस्सूक्तेमैत्रावरुणीप
रिधानीयातस्मान्नसंशंसेत्तदाहुर्यथावावस्तोत्रमेवंशास्त्रंविहृतावा
लखिल्याःशस्यंतेविहृतास्तोत्रियाः॥अविहृताइति॥विहृतमितिब्रू
यादष्टाक्षरेणद्वादशाक्षरमितितदाहुर्यथावावशास्त्रमेवंयाज्यातिस्रोदेव
ताःशस्यंतेऽग्निरिंद्रोवरुणऽइत्यथैंद्रावरुण्यायजतिकथमग्निरतेनेंरितेऽ

॥२९॥

३तियोवाऽअग्निः सवरुणः स्तदप्येतदृषिणोक्तं त्वमग्ने वरुणोजायसेयद्मि
तस्यदेवैं द्वावरुण्यायजतितेनाग्निरनंतरितोनंतरितेः॥२६॥१०॥ ॥श्री॥
३तिषष्ठमपंचीकायांचतुर्थोध्यायः॥ ॥ॐ म॥ शिल्पानिशंसंतिदे
वशिल्पान्येतेषांवैशिल्पानामनुकृतीह शिल्पमधिगम्यतेहस्तीकंसोवासो
हिरण्यमश्वतरीरथः शिल्पंशिल्पंहास्मिन्नधिगम्यतेय एवंवेदयदेवशि ते
ल्पानी३ आत्मसंस्कृतिर्वावशिल्पानिछंदोमयंवाऽएतैर्यजमानऽआ
त्मानंसंस्कुरुतेनाभानेदिष्ठंशंसतिरेतोवैनाभानेदिष्ठोरेतस्तत्सिंचति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमनिरुक्तंशंसंत्यनिरुक्तं वैरेतोगुहायोन्यांसिच्यतेसरेतोभिःश्रोभवतिश्वम
यारेतःसंजग्मानोनिषिंचदितिरेतःसमृध्या७एवंतंसनाराशंसंशंसतिप्रजा
वैनरोवाक्छंसःप्रजास्वेवतद्वाचंदधातितस्मादिमाःप्रजावदंत्योजायंतेतंहै
केपुरस्ताछंसंतिपुरस्तादायतनावागितिवदंतउपरिष्टादेका+द+यतनावागिति
वदंतोमध्यएवशंसेन्मध्यायतनावाइयंवागुपरिष्टान्नेदीयसीवोपरिष्टान्नेदीय
सीववाइयंवाक्होतारेतो॰तंसित्क्रामैत्रावरुणायसंप्रयछत्येतस्यतंप्राणान्का
ल्पयेति॥२७॥१॥वालखिल्याःशंसतिप्राणावैवालखिल्याःप्राणानेवास्यतत्कल्प

देके उपरिष्टा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतिताविहृताः त्वांसप्तिविहृतावाउमे प्राणाः प्राणेनापानोपानेनव्यानः सपष्ठः
प्रथमेसूक्तेविहरत्यर्द्धर्चेशोद्वितीयेक्रकुष्पस्तृतीयेसयत्प्रथमेसूक्तेविहर
तिप्राणंचतद्वाचंचविहरतियद्वितीयेचक्षुश्चतन्मनश्चविहरतित्तृतीयेश्रो
त्रंचतदात्मानंचविहरतितेहैकेसहबृहत्यौसहसतोबृहत्यौविहरंतितदु
पाप्तोविहरेकामोनितुप्रगाथाःकल्प्यंतेतिमन्त्रोमेवविहरेत्तथावैप्रगाथाः
कल्प्यंतेप्रगाथावैवालखिल्यास्तदेतिमन्त्रोमेवविहरेच्चंदेवातिमन्त्रोऽ।२।१।
आत्मावैबृहतीप्राणाःसतोबृहतीसबृहतीमन्त्रांसीत्सःआत्माथसतोबृ

स्मा२

५३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त

हतीतेप्राणाः अथबृहतीमथसतोबृहतींतदात्मानंप्राणैःपरिबृंहन्नेति
तस्मादतिमर्शामेवविहरेद्यद्देवातिमर्शाः॥३॥आत्मावैबृहतीपशवःसतोबृह
तीसबृहतीमशंसीत्सआत्माथसतोबृहतींतेपशवोऽथबृहतीमथसतोबृ
हतींदात्मानंपशुभिःपरिबृंहन्नेतितस्मादतिमर्शामेवविहरेद्यवोत्तमे
सूक्तेपर्यस्यतिसएवतयोर्विहारस्तस्यमैत्रावरुणःप्राणान्कल्पयित्वाब्राह्म
णाच्छंसिनेसंप्रयच्छतितेतंप्रजनयेति॥२४॥२॥सुकीर्तिंशंसतिदेवयोनि
र्वैसुकीर्तिःस्वयज्ञाद्देवयोन्यैयजमानंप्रजनयतिवृषाकपिंशंसत्यात्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैवृषाकपिरात्मानमेवास्यतत्कल्पयतितन्न्यूंखयत्यन्नंवैन्यूंखस्तदस्मैजागता
यंनाद्यंप्रतिदधातियथाकुमारायस्तनंसपांक्तोभवतिपांक्तोयंपुरुषःपंचधा
विहितोलोमानित्वङ्मांसमस्थिमज्जासयावानेवपुरुषस्तावंतंयजमानंसं
स्करोतितंब्राह्मणाच्छंसीजनयित्वाछावाकायसंप्रयच्छत्येनस्यत्वंप्रतिष्ठांक
ल्पयति॥२१॥एवयामरुतंशंसतिप्रतिष्ठावाएवयामरुत्प्रतिष्ठामेवास्यतत्क
ल्पयतितंन्यूंखयत्यंनंवैन्यूंखोन्नाद्यमेवास्मिंस्तद्दधातितज्जागतोवातिजा
गतोवासर्वंवाइदंजागतंवातिजागतंवासउमारुतआपोवैमरुतआपोन्न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३२

२ ना

मभिपूर्वमेवास्मिंस्तदं नाद्यूंदधाति तान्येतानि सहचराणीत्याचक्षते तेनाभ्गोनेदि
ष्टंवाळखिल्यावृषाकपिमेवयामरुत्तं तानि सहवा शंसेत्सहवानशंसेद्यदे
नानि नाशंसेद्यथा पुरुषं वा रेतो वा विछिंद्यात्तादृक्तत्तस्मादेनानि सहवा शंसे
त्सहवानशंसेत्सहवु लि लु आरवतर आभिर्वैश्वजितोहोतासत्रीन्द्रां चक्रे ॥ १८
बांवाएषाशिल्पानीविश्वजिति सांवत्सरिकेद्वेमध्यंदिने मभिप्रत्येतोहं ताहमि
थमेवयामरुतं शंसयानीति तद्धे तथा शंसयांचकार तद्धे तथा शस्यमाने गो
श्लः ऽआजगाम सहोवाच होतः कथा ते शस्त्रं विचक्रं प्लवत इति किंह्यु दित्येवया

३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मरुंदयमुत्तरतःशंस्यतइतिसहोवाचैंद्रोवैमध्यंदिनःकथेदंमध्यंदिनानि
नीषसीतिनिंदंमध्यंदिनानिनीषामीतिहोवाचयच्छंदस्विदममध्यंदिनेसा
च्ययंजागतोवातिजागतोवासर्वंवाइदंजागतंवातिजागतंवासउमारुतो
मेवसंशिष्टेतिसहोवाचारमाच्छावाकेत्यथहास्मिन्ननुशासनमीषेसहोवा
चैन्द्रमेषविष्णुन्यंगंशंसत्वथत्वमेतंहोतरुपरिष्टाद्द्वैधाय्यायेपुरस्ता
न्मारुतस्याप्यस्याथाइतितद्वतथाशंसयांचकारतदिदमप्येतर्हितत्र
थैवशस्यते॥३०॥ भातदाहुर्यदस्मिंश्चिष्वजित्यतिरात्रएवंषष्ठेहनिक

३३

ल्पते यज्ञः कल्पते यजमानस्य प्रजातिः कथमत्राग्राशस्त एव नाभानेदिष्ठो भवत्य
थ मैत्रावरुणो वालखिल्याः शंसति प्राणा रेतो वा अग्रेथ प्राणा एवं ब्राह्मण
च्छंस्यत्राशस्त एव नाभानेदिष्ठो भवत्यथ वृषाकपिं शंसति स आत्मा रेतो वा अग्रे
थात्मा कथमत्र यजमानस्य प्रजा तिः कथं प्राणा अविकॢप्ता भवंतीति यज
मानं ह वा एतेन सर्वेणैः क्रतुना संस्कुर्वंति स यथा गर्भो योन्यामंतरेवं संभव
च्छेतेनैव स छंदेवागेन सर्वः संभवत्येकैकं वा अंगं संभवतः संभवतीति सर्वा
णि चेत्समानेहन् क्रियेरन् कल्पत एव यज्ञः कल्पते यजमानस्य प्रजातिरथै

३ पश

३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तंहोतैवयामरुतंतत्तृतीयसवनेशंसतितद्यास्यप्रतिष्ठातस्यामेवैनंतदंततःप्र
तिष्ठापयति॥३१॥५॥छंदसांवैषष्ठेनाह्नाप्तानांरसोत्यनेदत्सप्रजापतिरबिभे
सराङःयंछंदसांरसोलोकानत्ये तीतितंपरस्ताच्छंदोभिःपर्यगृह्णान्नाराशंस्या
गायत्र्यारैभ्यात्रिष्टुभःपारिक्षित्याजगत्याःकारव्ययानुष्टुभःस्तत्सुनश्छंदःसु
रसमदधात्सरसैर्हास्यछंदोभिरिष्टंभवतिसरसैश्छंदोभिर्यज्ञंतनुतेयऽए ति ३
वंवेदनाराशंसीःशंसतिप्रजावैनरोवाक्शंसःप्रजास्वेवतद्वाचंदधाति
तस्मादिमाःप्रजावदंत्योजायंतेयएवंवेदयदेवनाराशंसीः॥६॥शंसतोवै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३४

देवाश्च ऋषयश्च स्वर्गंल्लोकमायंस्तथैवैतद्यजमाना शंसंत एव स्वर्गंल्लो
कं यंति ता: प्रग्राहं शंसति यथा वृषाकपिं वार्षाकपिं हि वृषाकपेस्तन्यायमेति
तासु नन्यूंखयें नीवीवनर्दं संहितासान्यूंखं रिभी: शंसति रिभं तो वै देवा:
श्च ऋषयश्च स्वर्गंल्लोकमायंस्तथैवैतद्यजमाना रेभं त एव स्वर्गंल्लोकं यंति
ता: प्रग्राहं शंसति यथा वृषाकपिं वार्षाकपं हि वृषाकपेस्तन्यायमेति ता
सु नन्यूंखयेन्नीवीवनर्दं संहिंसान्यूंखं: पारिक्षिती: शंसत्यग्निर्वै परिक्षि
दग्निर्हीमा: प्रजा: परिक्षेत्यग्निं हीमा: प्रजा: परिक्षियंत्यग्नेरेव सायुज्यं

ना२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सरूपतांसलोकतांमश्नुते यएवंवेद यद्देवपारिक्षितीःसंव

त्सरोवैपरिक्षित्संवत्सरोहीमाःप्रजाःपरिक्षेतिसंवत्सरंहीमाःप्र

जाःपरिक्षियंतिसंवत्सरस्यैवसायुज्यंसरूपतांसलोकतामश्नु

तेयएवंवेदताःप्रग्राहंशंसतियथावृषाकपिंवार्षाकपंहिवृषाकपि

स्तन्यायमेतितासुनंन्यूंखयेन्नीवीवनर्दैत्स्नहितासांन्यूंखःकारव्याः

शंसतिदेवावैयत्किंचकल्याणंकर्मोकुर्वंस्तत्कारव्याभिरवाप्नुवंस्त

थैवैतद्यजमानायत्किंचकल्याणंकर्मकुर्वंतितत्कारव्याभिराप्नुवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३५॥

तिताःप्रगाहं शंसति यथा वृषाकपिं वा षीकपं हि वृषाकपेस्तन्यायमेति
तासु नं न्यूंखयेन्नीवीव न दे॑ सहितासां न्यूंखो दिशो कुन्तीः शंसति दिशए
व तत्कल्पयति ताः पंच शंसति पंच वा इमा दिशश्चतस्रस्तिरश्च्य एकोर्ध्वा ता
सु नं न्यूंखयेन्नैवेव च निनर्दे॑न्नेदिमा दिशो न्यूंखयानीति ता अर्द्धर्चशः शंस
ति प्रतिष्ठाया एव जनकल्पाः शंसति प्रजा वै जनकल्पा दिश एव तत्कल्प
यित्वा तासु प्रजाः प्रतिष्ठापयति तासु नं न्यूंखयेन्नैवेव च निनर्दे॑न्नेदिमाः प्र
जा न्यूंखयानीति ता अर्द्धर्चशः शंसति प्रतिष्ठाया एवेंद्रगाथाः शंसतीन्द्र
गाथाभिर्वै देवा असुरानभिगायाथैनानत्यायंस्तथैवैतद्यजमाना इंद्रगाथाभिरेवा प्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यं भ्रातृव्य मभिगायार्थेन मतियंतिता अर्द्धर्चशः शंसति प्रतिष्ठाया एव ॥ ३ ॥ ६ ॥ एतन्न रा
प्रलापं शंसत्येतेन हो हवै मुनिरग्नेरायुर्द्देदर्शं यत्तस्यायातयाममभितिदेक आ
हुः सोब्रवीत्पुत्रान्पुत्रकाऽअग्नेरायुरदर्शं तदभिलपिष्यामि यत्किंचवद
मितन्मे मापरिगातेतिस प्रयपघेतेता अश्वाऽआप्लवंते प्रतीपं प्रातिसले
न भितितस्याभ्यग्निरैतशायनःऽएत्याकालेभि हायमुखमपयग्रहदिति
दृपन्नः पितेतितं होवाचापेह्यलसोभूर्योमेवाचमवधीः शतायुं गाम
करिष्यं सहस्रायुं पुरुषं पापिष्ठां ते प्रजां करोमि यो मे स्थमसक्थाऽइति

ऐ०२
३६
षे२

य

तस्मादाहुरभ्यग्नयऽएतन्नाग्नायनाऽऔर्वर्णांपापिष्ठाइतितंहैकेभूयांसंसं
संतिसननिर्धेद्यावत्काभंत्रांसेत्यवब्रूयादायुर्वाएतत्राप्रलापश्चायुरेवत
द्यजमानस्यप्रतारंतियऽएवंवेदयद्वैतत्राप्रलापाः३छंदसांहैषरसो
यदेतत्राप्रलापश्छंदस्स्वेवतद्रसंदधातिसरसैर्हास्यछंदोभिरिष्टंभव
तिसरसैश्छंदोभिर्यज्ञंतनुतेयएवंवेदयद्वैतत्राप्रलापाः३अयात
यामावाअक्षितिरेतत्राप्रलापोयातयामामेयज्ञेसदक्षितिर्मेयज्ञेस
दितिलंवाएतमेतत्राप्रलापंत्रांसतिपद्यावग्राहंयथानिविदंतस्यो

सूर्य
३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तमेनपदेनप्रणौतियथानिविदःप्रवल्हिकाःशंसतिप्रवल्हिकाभिर्वैदे
वाअसुरान्प्रवल्ह्याथैनानत्यायंस्तथैवैतद्यजमानाःप्रवल्हिकाभिरेवा
प्रियंभ्रातृव्यंप्रवल्ह्याथैनमतियंतिताअर्द्धर्चशःशंसतिप्रतिष्ठाया
एवाजिज्ञासेन्याःशंसत्याजिज्ञासेन्याभिर्वैदेवाअसुरानाज्ञायाथै
नानत्यायंस्तथैवैतद्यजमानाऽआजिज्ञासेन्याभिरेवाप्रियंभ्रातृव्यमाज्ञा
याथैनमतियंतिताऽअर्द्धर्चशःशंसतिप्रतिष्ठायाऽएवप्रतिराधंशंसे
तिप्रतिराधेनवैदेवाअसुरान्प्रतिराध्याथैनानत्यायंस्तथैवतद्यजमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३७

नाःप्रतिराध्येनैवाप्रियंभ्रातृव्यंप्रतिराध्याथेनमतियंस्यतिवादंशंसत्यति
वादेनवैदेवाअसुरानत्युद्याथेनानत्यायंस्तथैवैतद्यजमानाअतिवादेनै
वाप्रियंभ्रातृव्यमत्युद्याथेनमतियंतितमर्द्धर्चेशःशंसतिप्रतिष्ठायाऽ
एव॥७॥२२॥देवनीथंशंसत्यादित्याश्चहवाअंगिरसश्चस्वर्गेलोके
स्पर्धंतवयंपूर्वएष्यामोवयमितितेहांगिरसःपूर्वेश्वःसुत्यांस्वर्गस्य
लोकस्यददृशुस्तेग्निंप्रजिघ्युरंगिरसोवाएकोग्निःपरेह्यादित्ये
भ्यःश्वःसुत्यांस्वर्गस्यलोकस्यप्रब्रूहीतितेहादित्याअग्निमेवदृ

३७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सघः सुत्यांस्वर्गस्यलोकस्यददृशुः स्तानेत्याब्रवीत् सुत्यांवः स्वर्गस्य
लोकस्यप्रब्रूमऽइतितेहोचुरथवयंतुभ्यंसघः सुत्यांस्वर्गस्यलोकस्य
प्रब्रूमस्त्वयैववयंहोत्रास्वर्गंलोकमेष्यामऽइतिसतथेत्युक्त्वाप्रत्युक्तः
पुनराजगामतेहोचुः प्रावोचा३इति प्रावोचमितिहोवाचाथोमेप्र
तिप्रावोचन्नितिनो हि नप्रत्यज्ञास्थाः३इति॥ प्रतिवा अज्ञासमितिहो
वाचयत्रासावाएषोभ्यैतियआर्त्विज्येनतंयः प्रतिरुंधेघ्नराः सप्रति
रुंधेतस्मान्नप्रत्यरोत्सीतियदितस्मादपोज्जिगांसेद्यज्ञेनास्मादपोदि
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३८

यात्‌॥ यद्वित्वयाज्यस्वयमपोद्वितंतस्मात्‌॥८॥२४॥तेहादित्यानंगिर
सोयाजयंस्तेभ्योयाजयद्भ्यइमांपृथिवींपूर्णांदक्षिणानामददुस्तानि
यंप्रतिगृह्णीतातपत्तान्यवृंजंस्तासिंहीभूत्वाविजृंभंतीजनानचरत्त
स्याःशोचत्याइमेप्रदराःप्रादीर्यंतयेस्याइमेप्रदराःसमेवहैवततःपुरा
तस्मादाहुर्ननिवृत्तदक्षिणांप्रतिगृह्णीयान्नेन्माशुचाविंध्यादितियदि
त्वेनांप्रतिगृह्णीयादप्रियायैनांभ्रातृव्यायदद्यात्पराहैवभवत्यथयो
सोतपतीशएषोश्वःश्वेतोरूपंकृत्वाश्वाभिधान्यापिहितेनात्मनाप्र

ध्रा शु
चा वि २

३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३ + ब्रतिहितेमुमायंस्त्वांहृन्नरितर्नेप्रस्यगभ्णान्निति + ३

तिचक्रमगृह्मंवोनयामइतिसऽएषदेवनीथोनुच्यतेआदित्याहजरित
रंगिरोभ्योदक्षिणामनयंनेति॥तांहजरितर्नेप्रत्यायन्निति नहितइमा
प्रत्यायंस्तामुहजरितः प्रत्यायन्निति नहितइमांप्रत्यगृभ्णंस्तामुहजरि
तःप्रत्यगृभ्णन्निति प्रतिहितेमुमगृभ्णंनहानेतसन्नविचेतनानीत्येषहवा
अह्नांविचेतयिताजज्ञानेतसंनपुरोगवासइतिदक्षिणैवैयज्ञानांपुरोगवी णा
यथाहवाइदमनोपुरोगवंरिष्यत्येवंहैवयज्ञोदक्षिणोरिष्यतितस्मा
दाहुर्दातव्यैवयज्ञेदक्षिणाभवत्यप्यल्पिकाप्युतश्वेतआरुपचा॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३१
राम

उतोपद्याभिर्जविष्ठः॥ उतेमाःनुमानंपिपर्ति॥ आदित्यारुद्रावसवस्त्वेऌते॥ इदंराधःप्रतिगृभ्णीह्यंगिरइति॥ प्रतिग्रहमेवतद्राधसऽएवैनिदंराधोबृहस्स्थु॥ देवादत्त्वावरं॥ तद्वोअस्तुसुचेतनं॥ युष्मेअस्तुदिवेदिवे॥ प्रत्येवगृभायतेतिप्रत्येवैनमेतदजयमेषंतंवाएतंदेवच्छीथंशंसतिपदावग्राहंप्रधानिविदंतस्योतमेनेपदेनप्रणौतिप्रधानिविदः॥ ॥३५॥ नतेछंदः शंसति नतेछंभिर्वैदेवाअसुरानुपास्तचंतोतेवयुंजनेतेवमायपातेषांवैदेवाअसुराणांनतेछंभिरेवम्नतेछादयित्वाधैनानत्मा

ते

३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यंस्तथैवैतद्यजमानानामृते छंदिरे वा प्रियस्य धाम्नातस्यस्य रूतं छादयित्वा
येनमतिपंतिताअर्द्धर्चेशः शंसति प्रतिष्ठायाएवाहनस्याः शंसत्याहन
स्याद्धि रेतः सिच्यते रेतसः प्रजाः प्रजायंते प्रजा तिमेवतद्दधाति तादृशं शं
सति दशाक्षरा विराड्वै त्रं विराळन्नाद्रेतुः सिच्यते रेतसः प्रजाः प्रजायंते प्रजा
तिमेवतद्दधाति तान्यूंखवयत्यंनं वैन्यूंखो न्नाद्रेतः सिच्यते रेतसः प्रजाः प्र
जायंते प्रजातिमेवतद्दधाति दधिक्राव्णो अकारिषमिति दाधिक्रीं शंसति
देवपवित्रं वै दधिक्रा ३ देवाइदं व्याहनस्यां वाचमवादीत्तद्देवपवित्रेण वा
ई

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४० रांम

चंपुनीतेसानुष्टुभ्भवतिवाग्वा अनुष्टुप्तत्स्वेन छंदसा वाचंपुनीतेसुतासोमधु
मत्तमा इति पावमानीः शंसति देवपवित्रं वै पावमान्य इदं वा इदं व्याहनस्यां वा
चमवादीत्तद्देवपवित्रेणैव वाचंपुनीते ता अनुष्टुभो भवंति वाग्वा अनुष्टुप्
तत्स्वेनैव छंदसा वाचंपुनीते वद्वृष्णोअंशुमतीमतिष्ठ दितिस्यैंद्राबार्हस्पत्यं तृचं
शंसति विशोअदेवीरभ्याचरंतीर्बृहस्पतिनायुजेंद्रः ससाहइत्यसुरा विशं ह वै
२ ति दैवीनभ्युदाचार्य आसीत्स इंद्राबृहस्पती नेव युजौ सुपर्ववर्णमभिदासंतमपाह
स्तथैवैतद्यजमाना इंद्राबृहस्पतिभ्यामेव युजासुपर्ववर्णमभिदासंतमप ह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८१

तैतदाहुः संशंसेत्षष्ठेहान३ न संशंसेत३ इति३ संशंसेदित्याहुः कथमन्येष्वहः
सु संशंसति कथमत्र न संशंसेदिति यो रवल्वाहु नैव संशंसेत्स्वर्गो वै लोकः षष्ठम
हः समायी वै स्वर्गो लोकः कश्चिद्वै स्वर्गे लोके संमेतीति सत्य संशंसेत्समानं
तत्कुर्याद्यथयन्न संशंसती३ तत्स्वर्गस्य लोकस्य रूपं तस्मान्न संशंसेद्यदे
व न संशंसती३ एतानि वा अत्रोक्थानि नाभानेदिष्ठो वालखिल्या वृषाकपि
व रेवयामरुत्स यत्संशंसेदपैभ्य एतेषु कामं राध्नुयादेंद्रो वृषाकपिः सर्वाणि छंदां
स्यैतशप्रलापस्तत्र स ~~त्र~~ काममुपाप्नोत्येंद्रे जागतेथेदमैंद्राबार्हस्पत्यं सू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८२

त्कमैंद्रावार्हस्पत्यापरिधानीयातस्मान्नसंशंसेन्नसंशंसेत ॥३६॥ ॥ श्री ॥
इतिषष्ठमपंचिकायांपंचमोऽध्यायः॥ ॥शके१७१९ वर्षे पिंगलनाम
संवत्सरे उत्तरायणे ग्रीष्म ऋतुज्येष्ठ कृ.छ अमावास्यायांमंदवारे
तद्दिनेपुस्तकंसमाप्तं ॥ छोबळोपनामना काशिनाथस्यसुतेनसदा
शिवेनलिख्यते॥ ॥श्रीरामचंद्रार्पणमस्तु॥ ॥ शीव ॥

८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ ~~इति~~

३१२१ ॥इतिसप्तमपंचिकाप्रारंभः॥

॥हे पुस्तक काशिनाथ भट्ट ठेव॥

॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रा० ७

॥१॥

श्रीगणेशायनमः॥हरिहर ॐ॥अथातः परिशोधिर्भक्तिस्तस्यवि
भागंवक्ष्यामोहन्तृसजिह्वप्रस्तोतुःश्येनंवक्षउद्गातुःकंठःकाकुदः
प्रतिहर्तुर्दक्षिणाश्रोणिर्होतुःसव्याब्रह्मणोदक्षिणंसक्थिमैत्राव
रुणस्यसव्यंब्राह्मणाच्छंसिनोदक्षिणंपार्श्वंसांसमध्वर्योःसव्यमुप
गातृणांसव्योंसःप्रतिप्रस्थातुर्दक्षिणंदोर्नेष्टुःसव्यंपोतुर्दक्षिणाऽरु
रुरच्छावाकस्यसव्यऽआग्नीध्रस्यदक्षिणोबाहुरात्रेयस्यसव्यःस
दस्यस्यसदंश्चानूकंचगृहपतेर्दक्षिणौपादौगृहपतेर्व्रतप्रदस्य

सूर्य

॥१॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चे ३
वे

सव्योपादो गृहपतेर्भार्यायै व्रतप्रदस्योष्ठः ऽएनयोः साधारणो भवति तं
गृहपतिरेव प्राश्नीयाज्जाघनीं पत्नीभ्यो हरंति तां ब्राह्मणाय दध्युः स्कंध्या
श्च मणिकास्तिस्रः कीकसा ग्रावस्तुतस्तिस्रश्चैव कीकसाः ऽअर्द्धं च वैकर्त्त
स्योन्नेतुरर्द्धं चैव वैकर्त्तस्य क्लोमा च शमितुः स्तद्ब्राह्मणाय दद्याद्यद्यब्राह्म
णस्याच्छिरः सुब्रह्मण्यायै यः श्वः सुत्यां प्राहतस्याजिनमिळा सर्वेषां होतु
र्वा ता वा ऽएताः षट्त्रिंशतमेकपदा यज्ञं वहंति षट्त्रिंशदक्षरा वै बृहती
बार्हताः स्वर्गा लोकाः प्राणाश्चैव तत्स्वर्गांश्च लोकानाप्नुवंति प्राणेषु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रा० ७

॥२॥

चैवतत्स्वर्गेषुचलोकेषुप्रतितिष्ठंतोयंतिसएषस्वर्ग्यःपरुर्यऽएनमेवंवि
भजंत्यथयेतोन्यथातद्यथासेलगावापापकृतोवापरुंविमथ्नीरंस्ता
कृतावाऽएतांपज्रोर्वि भजंतिश्रौतऽऋषिर्देवभागोविदांचकारतामुहा
प्राच्यैवास्माल्लोकादुच्चक्राम तामुहगिरिजायबाभ्रव्यायामनुष्यःप्रोवाच
ततोहैनामेतदर्वाङ्मनुष्याऽअधीयतेधीयते॥१॥इतिसप्तमपंचिका
यांप्रथमोध्यायः॥ ॥ऋमू॥तदाहुर्यऽआहिताग्निरुपवसथेम्रियेतक
थमस्ययज्ञस्यादितिनैनंयाजयेदित्याहुरनभिप्राप्तोहियज्ञंभवतीति

सूर्य

॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदाहुर्यऽआहिताग्निरधिश्रितेग्निहोत्रेसान्नाय्येवाहविःषुवाम्रियेतका
तत्रप्रायश्चित्तिरित्सत्रैवैनान्यनुपर्यादध्याद्यथासर्वाणिसंदह्येरन्सात
त्रप्रायश्चित्तिस्तदाहुर्यऽआहिताग्निरासंनेषुहविष्षुम्रियेतकातत्रप्राय
श्चित्तिरित्तियाभ्यःएवतानिदेवताभ्योहवींषिगृहीतानिभवंतिताभ्यस्वा
हेत्येवैनान्याहवनीयेसर्वंहुंतिजुहुयात्सातत्रप्रायश्चित्तिस्तदाहुर्यआ
हिताग्निःप्रवासम्रियेतकथमस्याग्निहोत्रंस्यादित्यभिवान्यवत्सायाःप
यसाजुहुयादन्यदिवेतस्पयोयदभिवान्यवत्सायाऽअन्यद्दिवेतदग्नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२

होत्रं यस्येतस्यापि वा यत ऽएवं कुतश्च पयसा जुहुयुरथाप्याहुरेवमेवै
नानजस्नानजुहुत ऽइं धीरं ना शरीराणामाहूत्तौरिति यदि शरीराणि
न विंद्येरन्पर्णशरः स्रुष्टिः स्त्रीणि च शतान्याहृत्य तेषां पुरुषरूपकमि
व कृत्वा तस्मिंस्तामावृतं कुर्युरथैनां शरीरे राहुतैः संस्पर्शयेदासयेयु
रथ्यर्द्धं शतं कायेस क्थिनीद्वि पंचाशे च विंशे चारूद्वि पंच विंशे शेषं
तु शिरस्युपरि दध्यात्सा तत्र प्रायश्चित्तिः ॥१॥२॥ तदाहुर्यस्याग्निहो
स्युपावसृष्टा दुह्यमानोपविशेत्का तत्र प्रायश्चित्तिरिति तामभिमंत्र

सूर्य
२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येतयस्माद्गीषानिषीदसिततोनोअभयंकृधि॥ पशूंनः सर्वान्गोपायनमो
रुद्रायमीढुषइतितामुत्थापयेदुदस्थाद्देव्यदितिरायुर्यज्ञपतावधात्॥
इंद्रायकृण्वतीभागंमित्रायवरुणायचेत्यथास्याउदपात्रमूधसिचमु
खेचोपगृह्णीयादथैनांब्राह्मणायदद्यात्सातत्रप्रायश्चित्तिस्तदाहु
र्यस्याग्निहोत्र्युपावसृष्टादुह्यमानावाश्येतकातत्रप्रायश्चित्तिरिति

स्य

यानायांहवाऽएषायजमानंप्रतिख्यायवाश्यतेतामन्नपप्यादयेच्छां
त्यैशांतिर्वाअन्नंसूयवसाद्भगवतीहिभूयाऽइतिसातत्रप्रायश्चित्तिः

॥७॥

स्तदाहुर्यस्याग्निहोत्र्युपावसृष्टा दुह्यमाना स्पंदेत का तत्र प्रायश्चित्तिरिति सा यत्तत्र स्कंदयेत्तदभिमृश्य यजपेद्यदद्य दुग्धं पृथिवीमसृप्त यदोषधीरत्यसृपद्यदापः पयो गृहेषु पयोऽघ्न्यायां पयो वत्सेषु पयोऽस्तु तन्मयीति तत्र यत्परिशिष्टं स्यात्तेन जुहुयाद्यद्यलं होमाय स्याद्यद्युवै सर्वं सिक्तं स्यादथान्यामाहूय तां दुग्ध्वा तेन जुहुयादा त्वेव श्रद्धायै होतव्यं सा तत्र प्रायश्चित्तिः॥३॥ तदाहुर्यस्य सायं दुग्धं सान्नाय्यं दुष्येद्वापहरेद्वा का तत्र प्रायश्चित्तिरिति प्रातर्दुग्धं द्वेधं कृत्वा तस्यान्यतरां भ

सूर्य
॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तिमातच्यतेनयजेतसातत्रप्रायश्चित्तिस्तदाहुर्यस्यप्रातर्दुग्धंसांनाय्यंदुष्ये
द्वापहरेद्वाकातत्रप्रायश्चित्तिरिसैंद्रंवामाहेंद्रंवापुरोळाशंतस्यस्थानेनिरु
प्यतेनयजेतसातत्रप्रायश्चित्तिस्तदाहुर्यस्यसर्वमेवसान्नाय्यंदुष्येद्वापह
रेद्वाकातत्रप्रायश्चित्तिरिसैंद्रंवामाहेंद्रंवेतिसमानंसातत्रप्रायश्चित्ति
स्तदाहुर्यस्यसर्वाण्येवहवींषिदुष्येयुर्वापहरेयुर्वाकातत्रप्रायश्चित्तिरित्या
ज्यस्यैनानियथादेवतंपरिकल्प्यतयाज्यहविषेष्ट्यायजेततोन्याभि
ष्टिमनुल्बणांतन्वीतयज्ञोयज्ञस्यप्रायश्चित्तिः॥ ॥३॥ तदाहुर्यस्याऽ

स्य

॥५॥

ग्निहोत्रमधिश्रितममेध्यमापद्येतकातत्रप्रायश्चित्तिरितिसर्वमेवैनं
त्स्रुच्याभिपर्यासिच्यप्राङुदेत्याहवनीयेहुतांसमिधमभ्यादधात्यथो
त्तरतआहवनीयस्योष्णंभस्मनिरूह्यजुहुयान्मनसावाप्राजापत्ययर्चा
वचीतहुतंचाहुतंचसयद्येकस्मिन्नुन्नीतेयदिद्वयोरेषएवकल्पस्तच्चे
दुपनयितुंशक्नुयान्निःषिंचेतदुष्टमदुष्टमभिपर्यासिच्यतस्ययथो
न्नीतीस्यात्तथाजुहुयात्सातत्रप्रायश्चित्तिस्तदाहुर्यस्याग्निहोत्रमधिश्रि
तंस्कंदतिवाविष्यंदतेवाकातत्रप्रायश्चित्तिरितितदद्भिरुपनिनयेच्छांत्यै सूर्य

॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शांतिर्वाऽआपोथेन दक्षिणेन पाणिनाभिमृश्य जपति दिवं तृतीयं देवान्य
ज्ञो गात्ततो मा द्रविणमाष्टांतरिक्षं तृतीयं पितृन्यज्ञो गात्ततो मा द्रविणमा
ष्टपृथिवीं तृतीयं मनुष्यान्यज्ञो गात्ततो मा द्रविणमाष्ट ययारोजसा स्क
भितारजांसीति वैष्णु वारुणीमृचं जपति विष्णुर्वै यज्ञस्य दुरिष्टं पाति वरु
णः स्विष्टं तयोरुभयोरेव शांत्यै सा तत्र प्रायश्चित्तिस्तदाहुर्यस्याग्निहो
त्रमधिश्रितं प्राङुदायं स्खलेत्तेवापि वा भ्रंशेतैका तत्र प्रायश्चित्तिरिति स
यद्युपनिवर्त्तयेत्स्वर्गाल्लोकाद्यजमानमावर्त्तयेद्दक्षैवास्मादुपविष्टायैत
मग्निहोत्रपरीशेषमाहरेयुस्तस्य यथोन्नीतीस्यात्तथा जुहुयात्सा तत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रायश्चित्तिस्तदाहुरथयदिस्रुग्भिद्येतकातत्रप्रायश्चित्तिरित्यन्यांस्रु
चमाहृत्यजुहुयादथैतांस्रुचमग्निनाहवनीयेभ्यादध्यात्प्राग्दंडांप्रस
कुष्करांसातत्रप्रायश्चित्तिस्तदाहुर्यस्याहवनीयेहाग्निर्विद्येताथगा
र्हपत्यउपशाम्येत्कातत्रप्रायश्चित्तिरितिसयदिप्राचमुद्धरेत्स्वायत
नाच्यवेतयत्स्वयंचमस्त्रुरवघ्नंततच्चीतयन्मथेद्भ्रातृव्यंयजमानस्यप्रा
नयेद्यदनुगमयेत्प्राणोयजमानंजह्यात्सर्वमेवैनंसहभस्मानंसमो
प्यगार्हपत्यायतनेनिधायाथप्राचमाहवनीयमुद्धरेत्सातत्रप्रायश्चित्तिः॥५॥

सूर्य

नदाहुर्यस्याग्नावग्निमुद्धरेयुः कातत्र प्रायश्चित्तिरिति सयघनुपश्येदुद्धृत्य
पूर्वमपरं निदध्याद्यघनानुपश्येत्सोग्नयेग्निवतेष्टाकपालं पुरोळाशं नि
र्वपेत्तस्य याज्यानुवाक्ये अग्निनाग्निः समिध्यते त्वंह्यग्नेऽग्निनेत्या
हुतिंवाहवनीये जुहुयादग्नये ग्निवते स्वाहेति सातत्र प्रायश्चित्तिः स्तद्यस्या
हुर्यस्य गार्हपत्याहवनीयौ मिथः संसृज्येयातां कातत्र प्रायश्चित्तिरिति
सोग्नयेवीतये ष्टाकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये अग्न
आयाहि वीतये यो अग्निं देववीतय इत्याहुतिं वाहवनीये जुहुयादग्नये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥८॥

वीतयेस्वाहेतिसातत्रप्रायश्चित्तितदाहुर्यस्यसर्वएवाग्नयोमिथःसंसृ
ज्येरन्कातत्रप्रायश्चित्तिरितिसोग्नयेविविचयेष्टाकपालंपुरोळाशंनि
र्वपेत्तस्ययाज्यानुवाक्येस्वर्णवस्तोरुषसामरोचिस्वामग्नेमानुषीरी
ळतेविराड्व्याहुतिंवाहवनीयेजुहुयादग्नयेविविचयेस्वाहेतिसा
तत्रप्रायश्चित्तिस्तदाहुर्यस्याग्नयोन्यैरग्निभिःसंसृज्येरन्कातत्र
प्रायश्चित्तिरितिसोग्नयेक्षामवतेष्टाकपालंपुरोळाशंनिर्वपेत्तस्य
याज्यानुवाक्येअक्रंददग्निःस्तनयंनिवद्यौरधायथानःपितरःपरासः

सूर्य

॥८५॥

इत्याहुतिं वाहवनीये जुहुयादग्नये क्षामवते स्वाहेति सा तत्र प्रायश्चित्तिः॥
॥६॥५॥ तदाहुर्यस्याग्नयो ग्राम्येणाग्निना संदह्येरन्का तत्र प्रायश्चित्ति
रिति सोग्नये संवर्गायाष्टाकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवा
क्ये कुविदङ्ग नमसा ये वृधासः पुरा देवा अनवद्यास आसन् । सो अग्निं मा शिरे जातवेदो मंसीरिह त्वा हविर्भिर्देवा अपि त्वा वितस्थुः । स्मिन्नवाह धनं इत्याहुतिं वाहवनीये
जुहुयादग्नये संवर्गाय स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्यस्याग्न
यो दिव्येनाग्निना संसृज्येरन्का तत्र प्रायश्चित्तिरिति सोग्नये प्सुमते
ष्टाकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये अप्स्वग्ने सधिष्टव

२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं० ७

मर्यादधेमेधिरःपूतदक्ष इत्याहुतिं वाहवनीये जुहुयादग्नैपृमतेस्वा
हेति सातत्रप्रायश्चित्तिस्तदाहुर्यस्याग्नयः वावाग्निनासंसृज्येरन्का
तत्रप्रायश्चित्तिरिति सोग्नयेरुचयेष्टाकपालं पुरोळाशंनिर्वपेत्तस्य
याज्यानुवाक्ये अग्निःरुचिवृततमउदग्नेरुचयस्तवैत्याहुतिं वाहव
नीये जुहुयादग्नयेरुचयेस्वाहेति सातत्रप्रायश्चित्तिस्तदाहुर्यस्या
ग्नयऽआरण्येनाग्निनासंदह्येरन्कातत्रप्रायश्चित्तिरिति समेवारो
पयेदरणीवोल्मुकंवामोक्षयेद्यद्याहवनीयाद्यदि गार्हपत्याद्यदिन सूर्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आहुतिंवाहवनीयेजुहुयादग्नयेव्रतपतेस्वाहेतिसातत्रप्राय २
श्चित्ताकृत्याःसोग्नयेसंवर्गायाष्टाकपालंपुरोळाशंनिर्वपेत्तस्योक्तेयाज्या
नुवाक्ये आहुतिंवाहवनीयेजुहुयादग्नयेसंवर्गायस्वाहेतिसातत्रप्राय
श्चित्तिः॥१७॥यद्यातदाहुर्यआहिताग्निरुपवसथेश्रुकुर्वीतकातत्रप्राय
श्चित्तिरितिसोग्नयेव्रतभृतेष्टाकपालंपुरोळाशंनिर्वपेत्तस्ययाज्या
नुवाक्येत्वमग्नेव्रतभृच्छुचिर्व्रतानिबिभ्रद्व्रतपाअदब्धश्चित्तिस्तदाहुर्य
आहिताग्निरुपवसथेव्रत्यमापद्येतकातत्रप्रायश्चित्तिरितिसोग्नये
व्रतपतयेष्टाकपालंपुरोळाशंनिर्वपेत्तस्ययाज्यानुवाक्येत्वमग्ने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्रतपाअसियद्धोवयंप्रमिनामंव्रता नीत्याहुतिंवाहवनीयेजुहुयादग्नये
व्रतपतयेस्वाहेतिसातत्रप्रायश्चित्तिस्तदाहुर्यआहिताग्निरमावास्यांपौ
र्णमासींवातीयात्कातत्रप्रायश्चित्तिरितिसोग्नयेपथिकृतेष्टाकपालं
पुरोळाशंनिर्वपेत्तस्ययाज्यानुवाक्येवेत्थाहिवेधोअध्वनःआदेवानाम
पिपंथामगन्मेत्याहुतिंवाहवनीयेजुहुयादग्नयेपथिकृतेस्वाहेतिसात
त्रप्रायश्चित्तिस्तदाहुर्यस्यसर्वएवाग्नयउपशाम्येरन्कातत्रप्रायश्चित्तिरि
